# Shri Narasimha Gadyam or Gadya Stuti

# શ્રીનરસિંહગદ્યમ્ અથવા શ્રીનરસિંહગદ્યસ્તુતિઃ

## Document Information

Text title : Narasimha Gadyam or Gadya Stuti

File name : narasiMhagadyam.itx

Category : vishhnu, dashAvatAra

Location : doc_vishhnu

Latest update : June 20, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 20, 2021

*sanskritdocuments.org*

# Shri Narasimha Gadyam or Gadya Stuti

# શ્રીનરસિંહગદ્યમ્ અથવા શ્રીનરસિંહગદ્યસ્તુતિઃ

અથ ધ્યાનમ્ -
સત્યજ્ઞાનસુખસ્વરૂપમમલં ક્ષીરાબ્ધિમધ્યે સ્થિતં
    યોગારૂઢમતિપ્રસન્નવદનં ભૂષાસહસ્રોજ્વલમ્ ।
ત્ર્યક્ષં ચક્રપિનાકસ્નાભયકરાન્બિભ્રાણમર્કચ્છવિં
    છત્રીભૂતફણીન્દ્રમિન્દુધવલં લક્ષ્મીનૃસિંહં ભજે ॥

દેવાઃ -
ભક્તિમાત્રપ્રતીત !
નમસ્તે નમસ્તે !
અખિલમુનિજનનિવહ !
વિહિતસવનકદનકર !
ખરચપલચરિતભયદ !
બલવદસુરપતિકૃત વિવિધપરિભવભયચકિત !
નિજપદચલિત નિખિલમખમુખવિરહકૃશતરજલજભવમુખ
    સકલસુરવરનિકર કારુણ્યાવિષ્કૃતચણ્ડ દિવ્ય નૃસિંહાવતાર !
સ્ફુરિતોદગ્રતારધ્વનિભિન્નામ્બરતાર !
નિજરણકરણરભસચલિતરણદ સુરગણપટુપટહવિકટરવ
    પરિગત ચટુલભટરવરણિત પરિભવકર ધરણિધર !
કુલિશઘટ્ટનોદ્ભૂતધ્વનિગમ્ભીરાત્મગર્જિતનિર્જિતઘનાઘન !
ઊર્જિતવિકટગર્જિતસૃષ્ટખલતર્જિત સદ્ગુણગણોર્જિત !
યોગિજનાર્જિત !
સર્વમલવર્જિત !
લક્ષ્મીઘનકુચતટનિકટવિલુણ્ઠન વિલગ્નકુઙ્કુમ
    પઙ્કશઙ્કાકરારુણ મણિકિરણાનુરઞ્જિતવિગત શશાકલઙ્ક
    શશાઙ્કપૂર્ણમણ્ડલવૃત્ત સ્થૂલધવલમુક્તામણિ
    વિઘટ્ટિતદિવ્યમહાહાર !

લલિતદિવ્યવિહાર !
વિહિતદિતિજપ્રહાર !
લીલાકૃતજગદ્વિહાર !
સંસૃતિદુઃખસમૂહાપહાર !
વિહિતદનુજાપહાર !
યુગાન્તભુવનાપહાર !
અશેષપ્રાણિગણવિહિત !
સુકૃતદુષ્કૃત !
સુદીર્ઘદણ્ડભ્રામિત બૃહત્કાલચક્રભ્રમણકૃતિલબ્ધપ્રારમ્ભ !
સ્થાવરજઙ્ગમાત્મકસકલજગજ્જાલજલ ધારણસમર્થ
 બ્રહ્માણ્ડનામધેય મહાપિઠરકરણ પ્રવીણકુમ્ભકાર !
નિરસ્તસર્વવિસ્તાર !
નિરસ્તષડ્ભાવવિકાર !
વિવિધપ્રકાર !
ત્રિભુવનપ્રકાર !
અનિરૂપિતનિજાકાર !
નિયતભિક્ષાદિલબ્ધગતરસપરિમિત ભોજ્યમાત્રસન્તોષ !
બલવિજિત મદમદનનિદ્રાદિદોષજનધનસ્નેહલોભાદિ
 દૃઢબન્ધનચ્છેદ લબ્ધસૌખ્ય
 સતતકૃતયોગાભ્યાસનિર્મલાન્તઃકરણયોગીન્દ્રકૃતસન્નિધાન !
ત્રિજગન્નિધાન !
સકલપ્રધાન !
માયાપિધાન !
સુશુભાભિધાન !
મદવિકસદસુરભટમકુટ વનાનલનિભનયન !
વિલસદસિકવચભુજઘનવનલવનનવરુધિરક્રમકલ્પિત
 મીનશઙ્ચત્તરઙ્ગશૈવાલમહાજલૂકદુસ્તરપઙ્કજલનિવહકલિત
 મહાસુરપૃતનાકમલિનીવિલોલનકેલિપ્રિય મત્તવારણ !
દુષ્ટજનમારણ !
શિષ્ટજનતારણ !
નિત્યસુખવિચારણ !
સિદ્ધબલકારણ !

સુદુષ્ટાસુરદારણ !
સદૃશીકૃતાઞ્જન !
જનદોષભઞ્જન !
ઘનચિન્નિરઞ્જન !
નિરન્તરકૃતભક્તવાઞ્છન !
ગતસર્વવાઞ્છન !
વિશ્વનાટકસૂત્રધાર !
અઙ્ઘ્રિધૂલિજાતખસિન્ધુધાર !
મધ્વસૃક્લુતચક્રધાર !
જનિતકામ !
વિગતકામ !
સુરજનકામ !
ઉદ્ધૃતક્ષમ નિશ્ચલજનસત્ક્રિયાક્ષમ !
સુરનતચરણ !
ધૃતરથચરણ !
વિવિધસુરવિહરણ !
વિગતવિકાર !
વિકરણ !
વિબુધજનશરણ !
સતતપ્રીત !
ત્રિગુણવ્યતીત !
પ્રણતજનવત્સલ !
નમસ્તે નમસ્તે !

ઇતિ શ્રીનૃસિંહગદ્યં સમ્પૂર્ણમ્ ।
અથવા
ઇતિ શ્રીનૃસિંહગદ્યસ્તુતિઃ સમાપ્તા ।

*Shri Narasimha Gadyam or Gadya Stuti*

pdf was typeset on June 20, 2021

Please send corrections to *sanskrit@cheerful.com*